।। श्री गणराज समर्थ ।।

**अखिल गाणेशाचार्य श्रीसद्‌गुरू भ्रुशुंडियोगीन्द्राचार्यस्तुतं**

# गाणेशतेजोवर्धनस्तोत्रं सिद्धिबुद्धि स्तोत्रसहितं च

।। श्रीगणेशायनमः ।। श्रीमत्स्वानंदेशाय ब्रह्मणस्पतये नमः ।।
श्रीसिद्धिबुद्धिभ्यां नमः ।। श्रीमद्‌भ्रूशुंडयुवाच ।।

नमो नमस्ते गणनाथ ढुंढे । सदा सुशांतिप्रद शांतिमूर्ते ।।
अपारयोगेन च योगिनस्त्वां । भजन्ति भावेन नमो नमस्ते ।।१।।

प्रजापतीनां त्वमथो विधाता । सुपालकानां गणनाथ विष्णुः ।।
हरोऽसि संहारकेरेषु देव । कलांशमात्रेण नमो नमस्ते ।।२।।

क्रियात्मकानां जगदंबिका त्वं । प्रकाशकानां रविरेव ढुंढे ।।
यत्नप्रदानां च गुणेशनामा । कलांशमात्रेण नमो नमस्ते ।।३।।

शरीरभाजां त्वमथोऽसि बिंदुः । शरीरिणां सोऽहमथो विभासि ।।
स्वतोत्थकानां च सुबोधरूपः । कलांशमात्रेण नमो नमस्ते ।।४।।

विदेहकानामसि सांख्यरूपः । समाधिदानां च निजात्मकस्त्वम् ।।
निवृत्तियोगेषु ह्ययोगधारी । कलांशमात्रेण नमो नमस्ते ।।५।।

गणास्त एते गणनाथनामा । त्वमेव वेदादिषु योगकीर्ते ।।
सदा सुशांतिप्रद संस्थितोऽसि । भक्तेश भक्तिप्रिय ते नमो वै ।।६।।

‘ग’कारसिद्धिरपि मोहदात्री । ‘ण’कारबुद्धिरथमोहधात्री ।।
तयोर्विलासी पतिरेवनामा । गणेश्वरस्त्वं च नमो नमस्ते ।।७।।

‘ग’काररूपेण भवान् सगौणो । ‘ण’काररूपेण च निर्गुणोऽसि ।।
तयोरभेदे गणनाथनामा । योगेश भक्तेश नमो नमस्ते ।।८।।

किं वदामि गणाधीश महिमानं महाद्‌भुतं ।
यत्र वेदादयो भ्रांता इव जाताः प्रवर्णने ।।९।।

पतितानामहं श्रेष्ठः पतितोत्तम एव च ।
तव नामप्रभावेण जातोऽहं ब्राह्मणोत्तमः ।।१०।।

किंचित्संस्कारयोगेन विश्वामित्रादयः प्रभो ।
जाता वै ब्राह्मणत्वस्य ब्राह्मणा निर्मलाः पुरा ।।११।।

अहं संस्कारहीनश्च जात्या कैवर्तकोद्भवः ।
तत्रापि पापसक्तात्मा त्वया च ब्राह्मणः कृतः ।।१२।।

एवमुक्त्वा नतं विप्रं प्रांजलि पुरतः स्थितं ।
भक्तिभावेन संतुष्टस्तमुवाच गजाननः ।।१३।।

श्रीमद्‌गणेश उवाच ।।

वरान्वरय दास्यामि यान्यांस्त्वं विप्र वांछसि ।
त्वत्समो नैव तेजस्वी भक्तो मे प्रभविष्यति ।।१४।।

तद्वचनं श्रुत्वा साश्रुनेत्रो महामुनिः ।
ुंडी गद्‌गदा वाण्या तं जगाद गजाननम् ।।१५।।

प्रसन्नभावेन वरदोऽसि गजानन ।
यां भक्तिमुग्रां मे देहि संपूर्णभावतः ।।
ते तमुवाचाथ गणेशो भक्तवत्सलः।।१६।।

श्रीमन्मौद्‌गलोक्तं श्रीमद्‌भ्रुशुंडीविरचितं श्रीगाणेशतेजोवर्धनस्तोत्रं संपूर्णम्
ीमत्स्वानंदेशापर्णणमस्तु ।।